# Shri Nrisimha Shatakam

# શ્રીનૃસિંહશતકમ્

## Document Information

Text title : Shri Nrisimha Shatakam 06-07

File name : nRRisiMhashatakam.itx

Category : vishhnu, shataka, dashAvatAra

Location : doc_vishhnu

Proofread by : Saritha Sangameswaran

Description/comments : prakIrNastotrANi Stotrarnavah Ed. T.Chandrasekharan 1961 From stotrArNavaH 06-07

Latest update : March 27, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# Shri Nrisimha Shatakam

## શ્રીનૃસિંહશતકમ્

ચણ્ડબ્રહ્માણ્ડભાણ્ડભ્રમણભરબૃહદ્ઘોષનિર્ઘાતદૈર્ઘ્યૈ-
  દુર્દૈત્યવ્યાઘ્રશીઘ્રપ્રમથનકથનં સર્વદિક્ષુ પ્રકુર્વન્ ।
કૌટિલ્યક્રૂરદંષ્ટ્રોત્કટચટુલનટત્પ્રહ્વજિહ્વામહોલ્કઃ
  પ્રહ્લાદાહ્લાદહેતુર્દહતુ મમ મહદ્રંહસાંહો નૃસિંહઃ ॥ ૧॥

નૈષ્ઠુર્યૌજસ્વિચણ્ડત્રિદશગિરિમહાદણ્ડસન્તાડ્યમાન-
  બ્રહ્માણ્ડાતોદ્યભાણ્ડોડ્ડુમરરવસુહૃદ્ભાવસમ્ભાવનીયઃ ।
રુષ્ટેન્દ્રદ્વેષ્ટમુષ્ટિદ્રુઘણહતસભામણ્ડપસ્તમ્ભગર્ભા-
  દાવિર્ભૂતો વિભૂત્યૈ ભવતુ નરહરેરાદિઘોષો વિશેષાત્ ॥ ૨॥

દેવદ્વેષ્ટૃપ્રવેષ્ટોદ્ભટમદવિટપિભ્રંશઘોષાભિઘોરો
  દૈત્યેન્દ્રશ્રીપ્રકોષ્ઠોત્કટકટકઘટાકૂજકૂટાયમાનઃ ।
નિર્ઘોષો દુર્ઘટં દ્રાગ્ઘટયતુ વિકટપ્રેતરાડ્દ્વાઃકવાટો
  દ્ઘાટાટ્ટધ્વાનકલ્પઃ પ્રકટકટકટાકાટવોત્પાટવોઽસૌ ॥ ૩॥

અંહઃસઙ્ઘાતઘાતં ઘટયતુ નિનદો રંહસા નારસિંહઃ
  સ્વર્ગસ્ત્રીવર્ગરઙ્ગસ્થલપદકલનાનન્દિનાન્દીનિનાદઃ ।
દૈત્યેન્દ્રાપત્યતત્યુત્તમમહિમભરોદ્દામસૌભાગ્યભેરી-
  ભાઙ્કારો દિગ્દ્વિદન્તશ્રુતિચલનકલાધ્યાયસન્ધ્યાબ્દશબ્દઃ ॥ ૪॥

ઊર્મિ પ્રેઙ્ખોલખેલામુખરજલનિધિધ્વાનગાનાતિપીનઃ
  ક્રોધક્રૂરસ્ય શક્રદ્વિષિ હરિવપુષશ્ચક્રપાણેઃ પ્રઘોષઃ ।
કલ્યાણં લોકપાલ્યા વિરચયતુ હરિત્કુઞ્જરશ્રોત્રપાલ્યા
  બાલ્યપ્રાબલ્યશાલ્યાશુગવિકૃતિહૃતેઃ શ્લાઘિતો દાનપાલ્યા ॥ ૫॥

સંવર્તામ્ભશુમ્ભજ્જલદકુલગલસ્તમ્ભિગમ્ભીરતાભૃ-
  ન્મન્થાદ્રિક્ષુબ્ધદુગ્ધાબ્ધિજનિનદવિધાજઙ્ઘિવૈદગ્ધ્યદિગ્ધઃ ।
સમ્ભૂયોજ્જૃમ્ભમાણે સુઘટઘનઘૃણો દીર્ઘનિર્ઘાતવર્ગે
  શીઘ્રં નિર્ઘોષ એષ સ્ફુરતુ હૃદિ બૃહદ્ઘર્ઘરાઘોર ઐશઃ ॥ ૬॥

મોહં સૌવર્ગવર્ગે મહતિ બહલયન દ્રાઙ્મહર્ગેહભાજાં
　　નિષ્પીતશ્રોતગીતો નુ સનકજનકશ્રોત્રબાધિર્યધુર્યઃ ।
દિક્કુમ્ભિસ્તમ્ભકારી પ્રતિનિનદસમુત્તાલપાતાલતાલુ-
　　શ્ચણ્ડો બ્રહ્માણ્ડભેદી ભવતુ હરિરવઃ શ્રેયસે ભૂયસે વઃ ॥ ૭॥

ઊર્ધ્વપ્રોદ્ધૃતધૂમધ્વજ ઋજુજ્વાલમણિક્યદણ્ડં (વિમલજ્વાલમણિક્યદણ્ડં)
　　નીલપાલમ્બલીલપ્રચલિતરસનારાજિવિભ્રાજિબિમ્બમ્ ।
દીવ્યદ્દર્વીકરોર્વીપતિવિતતફણાશ્રેણિનિર્માણમન્તઃ
　　નિર્માયં ભાવયામઃ પ્રભુશિરસિ બૃહત્તાપમુક્તાપહત્યૈ ॥ ૮॥

ક્ષોણીભૃત્પક્ષપાતાદનુનૃહરિતનુક્ષિપ્યમાણૈર્વિતાનૈઃ
　　બાણૈર્વૈમુખ્યલક્ષ્યૈઃ શ્વસિતપવનતઃ ક્ષુણ્ણતત્કણ્ઠલક્ષમ્ ।
ઉદ્વર્ણૈર્મણ્ડલાગ્રૈરપિ ચરમચરે ખણ્ડનાયારિષણ્ડે
　　લાઙ્ગૂલોચ્ચણ્ડદણ્ડં દધદવતુ વિપન્મણ્ડલાત્કુણ્ડલીન્દ્રઃ ॥ ૯॥

ઉદ્દણ્ડૈર્જ્વાલષણ્ડૈર્જ્વલદનલદૃશોઽજાણ્ડદણ્ડોર્ધ્વખણ્ડ-
　　સ્ફોટો ભાવીતિ ભીત્યા પ્રથિતપૃથુફણશ્રેણિવિસ્તારિતશ્રીઃ ।
ઉર્વીવાહો વિનેકાર્બુદકુલકલનામૌલિનિષ્ઠપ્રતિષ્ઠઃ
　　શીઘ્રં નો દીર્ઘપૃષ્ઠપ્રભુરભયભૃતો ભૂષણં ભાવનીયઃ ॥ ૧૦॥

અગ્રપ્રોદપ્રજાગ્રન્મણિગણકિરણૈસ્તારકોન્મેષચોરં
　　નીચૈરુચ્ચૈરુદગ્ચદ્વિતતપૃથુફણશ્રેણિશાખાસહસ્રમ્ ।
લગ્નૈરગ્નિસ્ફુલિઙ્ગૈઃ સ્ફુટરુચિ નિટિલાક્ષણોઽપ્યભીક્ષ્ણં તથાધઃ
　　ક્રષ્ટા કષ્ટાનિ દૃષ્ટં ફણિપતિમુકુટં કૂટસિંહોપરિષ્ટાત્ ॥ ૧૧॥

સોમસ્પર્શાત્પ્રકર્ષં પ્રવહતિ દધતી યક્ષિણીચિત્રલક્ષ્મીં
　　યત્રાભાતે યદન્તર્વિલસતિ સતતં ગુહ્યકેશપ્રસારઃ ।
ગઙ્ગામ્ભશ્શુભ્રમભ્રઙ્કુષશિવશિખરભ્રાજિતં રાજતાદ્રેઃ
　　દેવસ્યોપર્યહીનોર્જિતફણપટલં પાટયેત્ સઙ્કટં નઃ ॥ ૧૨॥

પાયાદાકાશકાશોજ્જ્વલકુસુમસજ્યોતિરુજ્જૃમ્ભિતાગ્રા
　　પ્રત્યગ્રપ્રાગ્રથમુક્તાફલખચિતશિખસ્વર્ણસૂચીસખીના ।
ક્ષુદ્રચ્છિદ્રાલિમુદ્રાવિધુપરિધિવલચ્ચાલિનીશાલિનીતિઃ
　　લીલાપારીન્દ્રમૂર્તેરતિપરુએરુષો ભાસુરા કેસરાલી ॥ ૧૩॥

વૈકુણ્ઠોત્કણ્ઠિતાનામણિમગુણજુષાં પ્રાણિનાં પ્રીતિભાજાં

ગાત્રાદુત્ક્રાન્તમાત્રે સુખમયનિલયપ્રાપણાયાપયત્નમ્ ।
બ્રહ્માણ્ડસ્યોર્ધ્વખણ્ડેઽરચિષત સૃતયો નિઃસૃતૈર્યૈર્વિદાર્ય-
ચ્છૌર્યં હર્યક્ષમૂર્તેર્નિદધતુ હૃદિ તે કેસરા ભાસુરા નઃ ॥ ૧૪॥

હૃત્કુણ્ડાન્તઃપ્રચણ્ડપ્રતિઘહુતવહશ્રીશિરોરોમકૂપ-
સ્તૂપદ્વારોઘદંશુસ્તબક ઇતિ જને બિભ્રતિ ભ્રાન્તિમુચ્ચૈઃ ।
વિદ્યુજ્જ્વાલાવલીજપ્રતિભયરસનાચ્છિન્નચાઞ્ચલ્યસમ્પ-
લ્લુમ્પેત્ પ્રત્યૂહમત્યૂર્જિતમિહ નૃહરેર્ભાસુરા કેસરાલિઃ ॥ ૧૫॥

યૈરાસીદ્દૈત્યહત્યાહૃષિતહૃદમરશ્રેણિપૂજાવિતીર્ણ-
પ્રોન્મીલન્મલ્લિપુષ્પસ્તબકિતશિખરસ્વર્ણદૂર્વાસવર્ણૈઃ ।
વિદ્યુલ્લેખાસદૃક્ષૈર્નરહરશિરસિ સ્થૂલનક્ષત્રલક્ષૈ -
ર્લક્ષ્મીરક્ષ્મીલભાવં વિદધતુ વૃજિનોજ્જાસને કેસરાસ્તે ॥ ૧૬॥

સ્વીયશ્રીલેશચૌરીશ્ચિરમચિરરુચઃ સ્વોદરોદારદર્યાં
પર્યાપ્તીકૃત્ય ગોમું નભસિ ઘનઘટાં કોટિકુન્તચ્છટાભિઃ ।
નિર્યત્કીલાલકુલ્યં કિલ પરુષરુષા પાટયન્તીવ ચેતો
દૈત્યોરઃપાટનાટીકપટહરિસટાધાટિકાટીકતાં નઃ ॥ ૧૭॥

સપ્તાર્ચિર્મિત્રસૂત્રત્રુટનસુરસૃતિસ્રસ્તનક્ષત્રમાલા
મલ્લીજાલાભિસૃષ્ટિદ્વિગુણિતસુમનસ્સૃષ્ટિસન્તાનવૃષ્ટિઃ ।
સન્ધ્યાસમ્બધ્ધશોણમ્બુદપટલપટીપાટનક્ષેપલક્ષ્મી-
રજ્યત્કાષ્ઠાવધૂટીકપટહરિસટાસ્ફાટિકાધૂતિરવ્યાત્ ॥ ૧૮॥

સ્તબ્ધાકલ્પાબ્ધ્યનલ્પોચ્ચલદુરુલહરીઘોષકલ્પાદસીય-
ધ્વાનાદવ્યક્તભક્તસ્તુતિપદસદયગ્રાહિકા સાગ્રહેવ ।
રીત્યા સાજાત્યભાજામતિપરુષરુષામિન્દ્રિયાણાં ચતુર્ણાં
સઙ્કોચં લજ્જયેવોર્જિતમતિદધતી પાતુ કર્ણદ્વયી નઃ ॥ ૧૯॥

દ્રષ્ટણાં દૃષ્ટિસૃષ્ટેરુપરિકૃતભયાવિષ્ટતાવૃષ્ટિરુષ્ટે
ન્દ્રદ્વેષ્ટૃક્લિષ્ટજુષ્ટસ્મરણનિજજનાનિષ્ટમુષ્ટિન્ધયં તત્ ।
લીલાશૈલાટમૂર્તેરતિપરુષરુષોદ્ઘાટયત્પાટલશ્રી-
ઘાટં વિષ્ણોર્લલાટસ્થલમતિવિકટં પાટયેત્ સઙ્કટં નઃ ॥ ૨૦॥

નૃત્યત્કુલ્યાવલીવ પ્રલયસમુદયત્કાલરાત્રીવ ખેલ-
ચ્ચામુણ્ડામણ્ડલીવાટ્ટહસિતવિકટોત્તાલિવેતાલિકેવ ।
ઉદ્રિઙ્ગદ્રૌદ્રલક્ષ્મીરિવ કિમુત બૃહદ્ભૈરવોદ્ભાસિગર્ભા ।

ભ્રશ્યત્સ્વર્ભાનુવર્ગા ધ્રુવમવતુ વિભોર્ભીષણા ભાલભિત્તિઃ ॥ ૨૧॥

ઉદ્યન્નિર્ધૂમધૂમધ્વજમયનયનાઙ્ગારધાન્યાશ્રિતાસૌ
તત્તિર્યઙ્નિર્યદર્ચિર્નિચયપરિચયેનેવ રક્તાવસિક્તા ।
સાચિવ્યક્તત્રિરેખીવલિવિલયવતી સૂતકાલાગ્નિરુદ્રે-
વેદાનીમેવ દેવપ્રવર તવ હરે પાતુ ભાલસ્થલી નઃ ॥ ૨૨॥

નૃત્યન્તી કાલરાત્રીકરતલવિચલત્સાચિશૂલાનુકૂલા
મુદ્રા વિદ્રાવિરૌદ્રામ્બુનિધિનાધિવલલ્લોલકલ્લોલલીલામ્ ।
બિભ્રત્યેતન્મુખાન્તઃસમુપગતમહાકોપસોપાનપાલિ-
ર્ગોપાયેન્નસ્ત્રિરેખી નિટિલસહચરી ચિત્રપારીન્દ્રમૂર્તેઃ ॥ ૨૩॥

ગાઙ્ગેયાભિખ્યયા યજ્જગતિ યદુદિતં શાન્તનુસ્ફારમોદે
પાર્થોનાયોધનશ્રીરપિ યદધિપયે ચોર્ધ્વતેજઃપ્રસિદ્ધિઃ ।
યસ્યાસ્તે કૃષ્ણવર્ત્માનુસૃતિપરમહો ભાલતારાતિદાહિ
ભ્રૂવલ્લીમધ્યનેત્રં નરહરિવપુષો નૌમિ ભીષ્મસ્વરૂપમ્ ॥ ૨૪॥

રુક્ષાભિખયાં વિવસ્વદ્રથચરણરયક્ષુણ્ણરૂક્ષેઽન્તરિક્ષે
સ્ફારં સ્ફારં સ્ફુરદ્ભિર્વિદધતિ બહલૈરુત્પતદ્ભિઃ સ્ફુલિઙ્ગૈઃ ।
રૂક્ષશ્રેણીસદૃક્ષે ક્ષિપતિ દિશિ દિશિ ધ્વાન્તજાલે શિખોલ્કા-
માલા લાલાટનેત્રે વિહરતુ નહરેસ્તત્ર ચિત્રે મર્તિનઃ ॥ ૨૫॥

હૃષ્ટાન્ વૃષ્ટપ્રસૂનાન્નભસિ દિવિષદો નૂત્નરત્નપ્રસૂનૈઃ
સ્ફૂર્જત્ફુલ્લરફુલિઙ્ગૈઃ સુહૃદિ હિમહિમૈર્જ્વાલહસ્તૈરુદસ્તૈઃ ।
શીઘ્રં પ્રત્યર્ઘદિર્ઘીકરણબહુગુણે મજ્જયલ્લજ્જિબ્ધૌ
નેત્રં સદ્વીતિહોત્રં દહતુ નરહરે રંહસાંહ સ્તૃણાનિ ॥ ૨૬॥

વેલ્લજિહ્વોલ્બણેન પ્રચલિતબહલજ્વાલજિહ્વાસહસ્રં
સ્ફારસ્ફૂર્જત્સ્ફુલિઙ્ગસ્ફુટમણિપટલં પ્રાંશુરત્નાંશુભાસા ।
સાર્ધં મોર્ધ્વર્ધ્વાસિન્ધુસ્થલવસતિજુષા ભોગિમૂર્ધાભિષિક્તે-
નાબદ્ધસ્પર્ધમદ્ધાવતુ હરિનયનં ભાલભદ્રાસનેદ્ધમ્ ॥ ૨૭॥

લોકે વારપ્રવૃત્તિઃ સમુદયતિ યતઃ સન્નરાજીવચિત્તે
બિભ્રાણશ્ચક્રબન્ધૂકરણકુતુકિતાં યો નિશાશેષભાતઃ ।
નિત્યં ધત્તે સદૃક્ષોદયમનુવિનતાનન્દનોલ્લાસધારી
સશ્રીપારીન્દ્રમૂર્તેરપહરતુ તમો ભાલહગ્બાલહેલિઃ ॥ ૨૮॥

ચૂડાપાતાલપાલોલ્બણમણિકિરણાકર્ષણોદઞ્ચિતૈત-
 સ્ફૂર્જત્ફૂઙ્કારસઙ્ક્રોચિતવિતતશિખાપાણિરભ્યાસભાગ્ભ્યામ્ ।
સાર્ધં દૃગ્ભ્યાં સખીભ્યામિવ કુતુકવશાદંશુપાંસુપ્રપઞ્ચૈ-
 રઞ્ચન્ત્વન્યોન્યખેલાં જયતિ નરહરેર્ભાલદગ્બાલિકેયમ્ ॥ ૨૯॥

ખદ્યોતદ્યોતલેશો દિન ઇવ ન દરં દ્યોતતે વૈધુતોઽગ્નિઃ-
 યસ્યાગ્રે નોગ્રભાવાગ્રહમપિ વહતે સ ગ્રહગ્રામણીશ્ચ ।
ઔર્વો દુર્વારદુર્વાસિત ઇવ વિગલદ્ગર્વમમ્ભોધિગર્ભે
 લીનો યદ્ધેતિહીનો વિહરતુ નૃહરેસ્તત્ર નેત્રે મતિર્નઃ ॥ ૩૦॥

યન્મિત્રો વીતિહોત્રોઽપ્યતિશયદહનાધ્યાયમધ્યાપિતૌ તૌ-
 શક્તૌ સમ્યગ્ગ્રહીતું ન કિમપિ નિબિડોત્તાડિતાવંશુવેત્રઃ ।
એકો રક્તાવસેકાદરુણ ઇતિ ગતઃ ખ્યાતિમન્યોઽપિ ધામ્ના
 દુઃખાદ્યેવસ્ય તેજો ગુરુનિટિલતટીલોચનં મોહયેન્નઃ ॥ ૩૧॥

લક્ષ્મીવક્ષોજકુમ્ભસ્થલકૃતલલિતાલીકબાહ્લીકલેપઃ
 પ્રહ્વપ્રહ્લાદમૌલાવતુલવલયિની શોણશાટી યદર્ચિઃ ।
રૂક્ષેન્દ્રદ્વેષ્ટૃસૃષ્ટેરુપરિ નિપતિતા પાવકાસ્ત્રસ્ય વૃષ્ટિ-
 ર્દૃષ્ટિર્લાલાટિકી નઃ કપટહરિતનોઃ પાટયેત્ સઙ્કટં સા ॥ ૩૨॥

મઞ્જિષ્ઠામઞ્જુચેલવ્યજનમિવ વલત્તન્તુજાલં સમન્તાત્
 આસ્યાન્તર્લાસ્યવત્યાઃ શ્રમશમનકરં રોષલક્ષ્મીયુવત્યાઃ ।
ઘોણાદણ્ડોપરિષ્ટાત્ પ્રકટિતમરુણં શ્લિષ્ટશોણાંશુવેષ્ટં
 વૃત્તં હન્તા નુ દન્તાવલદલનતનોરક્ષિ સન્તાપમન્તઃ ॥ ૩૩॥

ઉદ્વેલ્લજ્જ્વાલવલ્લીચ્છલમૃદુલચલચ્છોણચેલાઞ્ચલશ્રી-
 સ્ફારૈઃ ફુલ્લૈઃ સ્ફુલિઙ્ગૈઃ ખલુ ખચિતશિખામન્દમન્દારવૃન્દૈઃ ।
સ્વધ્યાતૃણાં નૃણાં સાભયવરકરતા કીર્તિતા સિંહમૂર્તેઃ
 બન્ધુકચ્છાયબન્ધુચ્છવિરવતુ વિભોર્ભૈરવી ભાલદૃષ્ટિઃ ॥ ૩૪॥

માદ્યદ્ દુર્દાનવોદ્યન્મદદલનફલં ભક્તભૂયોવિપત્તિ-
 પ્રત્યાદેશં ફલં ચાકલયિતુમસુરશ્રેષ્ઠનિષ્ઠા ફલં ચ ।
કોપશ્રીપાટલાયાઃ કપટનૃહરિહૃદ્ભ્રાજભાનોદ્ભવાયાઃ
 પુલ્લત્ફુલ્લત્રયીવોલ્લસતુ મદશુભસ્યાપનેત્રી ત્રિનેત્રી ॥ ૩૫॥

માયાગન્ધં નિરુન્ધન્ ભુવિ પદકમલાભોગસમ્પાદહેતુઃ
 સંવાદી તાપદાને પરમહિમકરેણાત્તકારુણ્યસમ્પત્ ।

યત્પાતઃ શત્રુજાતે સુહૃદિ ચ સદૃશો દિવ્યપારીન્દ્રમૂર્તે-
 ર્જૈત્રી સા નસ્ત્રિનેત્રી ભવભયવિભવસ્યાપનેત્રી ભવિત્રી ॥ ૩૬॥

જ્વાલાવલ્લી વિશાલા સ્ફુરતિ નરહરેર્ભાલનેત્રાલવાલે
 તામેવોચ્ચૈઃ સ્ફુલિઙ્ગસ્ફુટકુસુમઘટાં કોટિ દેશે દધાના ।
અદ્ધા યદ્ધેતુકોચ્ચાવચફલપટલપ્રાયતામાયતાલં
 સંવર્તોદ્વૃત્તવાહ્નિદ્યુમણિગણબૃહદ્ભાનુદમ્ભોલિવર્ગઃ ॥ ૩૭॥

સાર્ધં યોદ્ધું સમૃદ્ધૈર્નભસિ ભપતિના દુર્જયૈર્ધ્વાન્તયોધૈઃ
 ધૃષ્ણિશ્રેણીભટાનામહમહમિકયા સત્વરોદિત્વરાણામ્ ।
વાહાસઙ્ઘટ્ટપિષ્ટાઙ્ગદમણિપટલીપ્રાંશુપિષ્ટાતવૃષ્ટાઃ
 કષ્ટાનાં સન્તુ નષ્ટ્યૈ નરહરિવપુષો ફાલદૃષ્ટેઃ સ્ફુલિઙ્ગાઃ ॥ ૩૮॥

ભક્તપ્રાણિપ્રહાણિપ્રચલદસિલતાપાણિદુર્દૈત્યહત્યા-
 તિક્રૂરક્રોધયોધપ્રચલનખચિતશ્મશ્રુલેખાસખી નઃ ।
રૌદ્રશ્રીકાદ્રવેયીદ્રુતલલનવલજ્જિહ્વિકા પ્રોજ્જિહાના-
 સા નાગદ્વેષિમૂર્તેર્વિહરતુ હૃદયે વેલ્લિતા ચિલ્લિવલ્લી ॥ ૩૯॥

લાસ્યેનોલ્લાસ્યમાના નિરવધિવિગલદ્ઘોઘગોધિપ્રતોલી-
 યાવત્ક્રોધાવકીર્ણાઞ્ચલચપલચલચ્ચામરોડ્ડામરશ્રીઃ ।
ઘોણાદણ્ડાગ્રજાગ્રજ્જયપરિચયકૃદ્વૈજયન્તી જયન્તી
 રૌદ્રસ્ય દ્રાગભદ્રં વિઘટયભુ હઠાદ્ભ્રૂદ્વયી નૃદ્વિપારેઃ ॥ ૪૦॥

દુર્દાન્તધ્વાન્તભેકપ્રતિભયસરયશ્વાસફૂત્કાર ઘોરા
 પ્રેઙ્ખોલશ્મશ્રુલેખાચ્છલચલરસનાદ્વન્દ્વવિભ્રાજમાના ।
વેષ્ટું વા લમ્બમાનાનનબિલનિલયં ભાલભિત્તેરધસ્તાત્ ।
 સ્યાદ્દ્રોણાદીર્ઘપૃષ્ઠી મદઘવિઘટિનીકૂટશૈલાટમૂર્તેઃ ॥ ૪૧॥

સૂર્યાદિજ્યોતિરુર્જસ્વલકરપટલીમોટનાલમ્પટોઽસૌ-
 દૈત્યેન્દ્રોદ્દામધામદ્યુમણિઘૃણિઘટાલઙ્ઘનેનાભિઘાતી ।
લોકાલોકાદ્રિરીત્યુત્પ્રતિઘ ઇવ તદુત્તુઙ્ગશ◌ૃઙ્ગત્વભઙ્ગે
 જઙ્ઘાલો જઙ્ઘનીતુચ્છલહરિપરુષશ્વાસવાતોઽઘસઙ્ઘાન્ ॥ ૪૨॥

ક્રૂરક્રોધાગ્નિકીલક્કથિત ઇવ પૃથુશ્વાસભૂમા નૃસિંહ-
 સ્યોગ્રાણામગ્રગાણામનુતનુઘટિતરફારવિસ્ફોટકોટિઃ ।
વાર્ધિનામૈક્યમૃદ્ધં ઘટયિતુમિવ જઙ્ઘાલજઙ્ઘાલતાભ્રૂ (જઙ્ઘાલઝમ્ઝાસમીરો)
 દ્રાગંહઃસઙ્ઘનીતિર્મતં સકલશુભોલ્લઙ્ઘની જઙ્ઘનીતુ ॥ ૪૩॥ (નીતિર્મમ, શુભોલ્લઙ્ઘને)

દ્વીપાન્તર્ઘોતમાનક્ષિતિધરનિકરક્ષુદ્રતામુદ્રિતૌજા
    લોકાલોકાદ્રિમૂર્ધાગ્ચલચલનધનશ્લાઘનીયાપદાનઃ ।
દ્રાગ્મિત્ત્યાઘાતજાતપ્રતિઘુરિતરયભ્રાન્તગાઙ્ગેયરેણુ-
    ભ્રાજદ્બ્રહ્માણ્ડભાણ્ડઃ સ્ફુરતુ હૃદિ હરેઃ શ્વાસરૂપી નભસ્વાન્ ॥ ૪૪॥

ઘોણાશ્વભ્રોરુગર્ભાદતિપરુષખરશ્વાસધારાનિરસ્તા-
કાલવ્યાલદ્વયીવોદ્યતફણયુગલીશ્રોત્રગર્ભપ્રદેશે
નેત્રાયુર્વાયુયાચિન્ચસુરપરિષદઃ સ્થૂલતાલાલિતાન્તા (નેત્રાયુર્વાયુપાયિન્ચ)
સ્મેરા શ્મશ્રુદ્વયી નો દ્વિપદલનતનોસ્તુઙ્ગભાસઙ્ગતાવ્યાત્ ॥ ૪૫॥

કૌટિલ્યેનૈવ લ્ખલ્વાચરિતપરિચિતા વક્રતાશુભ્રતાભ્યાં
    ન્યસ્યન્તી ક્ષીરકણ્ઠદ્વિજનપતિઘટાકણ્ઠપીઠે પ્રકોષ્ઠમ્ ।
તાભ્યાં તિગ્મત્વયુગ્ભ્યાં નગરવરવધૂનેત્રકોણાન્તમૈત્રી
    દંષ્ટ્રધાટી સ્ફુટા નઃ કપટહરિતનોઃ પાટયેત્ પાપકૂટમ્ ॥ ૪૬॥

આવિર્ભૂયાસ્યગર્ભાદ્રવમસુરવધૂગર્ભવિભ્રંશભીમં
    જિહ્વાં ચાલોક્ય દૈત્યક્ષતજરસઝરીગ્રાસલોલામિવોગ્રામ્ ।
કૂરાસ્થિગ્રન્થિકોટીવિઘટનકટુતોદ્ધાટિનીવાતિઘોરા
    પાયાચ્છૈલાટચેષ્ટાનુકૃતિકૃતિભૃતો દન્તધાટી પ્રભોર્નઃ ॥ ૪૭॥

પ્રહ્લાદોદ્રિક્તનિદ્રપ્રમદકુમુદિનીજાગરારાગરાજો
    રુષ્ટેન્દ્રદ્વેષ્ટૃધૃષ્ટિસ્ફુટપુટકઘટાદર્શિતાક્ષુદ્રનિદ્રાઃ ।
વિધ્વસ્તાતિપ્રશસ્તામરનિવહમહાસાધ્વસધ્વાન્તધારાઃ
    લીલાશૈલાટમૂર્તેર્દશનશશિકલાશ્રેણયઃ પ્રીણયન્તુ ॥ ૪૮॥

દૈત્યોરઃપીઠપાટપ્રકટવિકટરુટ્કક્ખટોધૃષ્ટદંષ્ટ્રા
    સઙ્ઘટ્ટસ્પષ્ટદૃષ્ટજ્વલનકણગણશ્રેણયોઽનિષ્ટનષ્ટૌ ।
જાયન્તાં જાગરૂકા વિદલિતદનુજવ્યૂહવાહોર્જિતેજઃ
    પૂગપ્રોદ્ગીર્ણચૂર્ણપ્રચયસમરુચો રંહસા સિંહમૂર્તેઃ ॥ ૪૯॥

નિર્યલ્લાલાટદૃષ્ટિજ્વલનઘૃણિઘટાપ્લુષ્ટદુષ્ટૌઘવંશ-
    સ્થૂલાસ્થિગ્રન્થિકૂટસ્ફુટનચટચટાટ્ટારવસ્ફારશઙ્કામ્ ।
કુર્વન્ ગીર્વાણવર્ગેઽદ્ભુતકલનનભોભાજિ નિશ્શેષયેન્નો
    દોષાન્ રોષપ્રપોષો મિષહરિવપુષો દન્તસઙ્ઘટ્ટઘોષઃ ॥ ૫૦॥

મન્દારોદારસિન્દૂરકશિશુબિસિનીબન્ધુબન્ધૂકસન્ધ્યા-

નિર્યન્નિર્યાસકાર્યાકૃતિરિવ કલિતારુણ્યતારુણ્યસમ્પત્ ।
સપ્તાર્ચિસ્તપ્તખડ્ગપ્રતિનિધિરધિકોલ્લાસિલૌલ્યોલ્બણશ્રી-
રાસ્તાં નસ્તાપભાજાં નરહરિરસનાવાસનાશાસનાય ॥ ૫૧॥

સૌક્ષ્મ્યેણાગ્નેર્નિદાને વદન ઇહ સતઃ ક્રોધદોધૂયમાન-
પ્રાણદ્રાધિષ્ઠભસ્ત્રાજવનપવનતો દીપ્તિશીલેવ કીલા ।
ક્રોધાન્ધાનાં નખાનામસુરવરહૃદો દર્શનાયેવ સમ્યક્-
પ્રહ્વા જિહ્વા મદંહઃ પ્રદહતુ મહિમોન્નાહભૃન્નારસિંહી ॥ ૫૨॥

નિષ્ક્રાન્તેવાનયન્તાદ્ગલરવવલતઃ સાધ્વસધ્વસ્તધૈર્યાત્ (નિષ્ક્રાન્તેવાનયનાદ્ગલરવવલતઃ)
પ્રોન્મીલત્કમ્પસમ્પદ્ભયમયચરિતોદ્ભાવનપ્રેક્ષયેવ ।
દંષ્ટ્રાભિઃ સ્પષ્ટરોચિઃપટલકરઘટાઘટ્ટનીભિઃ પ્રઘૃષ્ટા-
શ્વાસેવ સ્વાન્તદેશે નરહરિરસના વાસનાશાસની સ્યાત્ ॥ ૫૩॥

દૈતેયોદ્દામધામદ્રુમદહનધૃતાટોપનોપાગ્નિકીલા
પ્રહ્લાદોદ્રિક્તભક્તિચ્છલનિલયચલચ્છોણકેતુચ્છીવર્નઃ ।
સ્યાજ્જિહ્વા નારસિંહી વિબુધપતિશુભા દૃષ્ટવાસન્તવાર્તા-
શ્લિષ્ટશ્રીવલ્લિહૃષ્ટપ્રથમકિસલયશ્રીરનિષ્ટપ્રણષ્ટ્યૈ ॥ ૫૪॥

ચઞ્ચત્પઞ્ચપ્રકારે મુખ ઇહ ભવિતું સામ્પ્રતં પઞ્ચ જિહ્વાઃ
વ્યક્તૈકાગ્રે મહોગ્રા પુનરપિ ભવિતારશ્ચતસ્રોઽધિપાર્શ્વમ્ ।
ઇત્યાલોચ્યેવ સીમાજિવટવિષુતયા કર્ણજાહાં જિહાને
સ્મર્તવ્યે સિંહમૂર્તેર્ભૃશમપશરણૈઃ સૃક્કણી ચક્રપાણેઃ ॥ ૫૫॥

પ્રેઙ્ખન્નિઃશ્વાસલેખં પ્રકટકટકટસ્ફોટવિસ્પષ્ટદંષ્ટ્રં
શ્મશ્રુસ્મેરત્વભીષ્મં કુટિલમવિકટભ્રૂકુટીભ્રાજમાનમ્ ।
ક્રોધક્રૂક્ષિચક્રં સરભસરસનાભીમતં શ્રીમતઙ્ગ- (સરભસરસનાભીષણં)
દ્વેષ્ટુર્દ્રાગ્દ્વેષ્ટુ વક્ત્રં મમ વિષમદશાસ્રષ્ટુરિષ્ટં ગરિષ્ઠમ્ ॥ ૫૬॥

દંષ્ટ્રાસઙ્ઘટ્ટઘોરજ્વલદનલકણશ્રેણિકર્ણપ્રસૂને
પ્રોદ્યન્નિર્ઘોષવાદ્યે પ્રચલિતબહલજ્વાલજિહ્વામહોલ્કે ।
રૌદ્રશ્રીલાસ્યરઙ્ગે પ્રકટવિકટરુટ્સૂત્રધારપ્રચારે
સદ્યો વિદ્યોતમાનદ્વિપદલનતનોરાનને નો રતિઃ સ્યાત્ ॥ ૫૭॥

વહ્નિપ્રાચીરદીપ્રપ્રસૃમરપરિતઃકેસરે સ્પષ્ટદંષ્ટ્રા
કુડ્યાસંશ્લિષ્ટયષ્ટિપ્રચયપરિચિતે ભ્રૂલતાતોરણાઢ્યે ।
જાગ્રત્પ્રગ્રીવમિત્રપ્રતિભયનયને પ્રહ્વાજિહ્વાલતોદ્ય-

ત્સોપાને રૌદ્રલક્ષ્મીગૃહ ઇવ નૃહરેરાનને માનનાસ્તામ્ ॥ ૫૮॥

નિસ્ત્રિંશસ્રંસનં પ્રાક્સૃજતિ કરતલાજ્જિહ્વયા નારસિંહે
દંષ્ટ્રાભિઃ કૃત્તશસ્ત્રીપટલવિઘટને ભ્રૂલતાવિભ્રમેણ ।
કોદણ્ડભ્રંશચણ્ડે શિતવિશિખહરે શ્રીકટાક્ષચ્છટાભિઃ
દૃષ્ટાનાં દૃષ્ટિમાત્રાત્ પ્રતિકૃતિકૃતિનિ પ્રીતિરાસ્તાં મુખે નઃ ॥ ૫૯॥

ઉદ્યજ્જિહ્વામહોલ્કે મુખરિમખરનિર્ઘોષનિર્ઘાતઘોરે
ભ્રૂવલ્લીશ્મશ્રુલેખાવિલસિતવિલસદ્ધૂમકેતુપ્રકાશે ।
સક્રોધા ક્ષુદ્રચક્ષુસ્ત્રિકવિકસનસન્દર્શિતાર્કત્રયીકે
તસ્યાસ્યે સ્યાન્નમસ્યાસુરકુલદલના દર્શિતા જન્યસૈન્યે ॥ ૬૦॥

દંષ્ટ્રાધાટીકઠોરક્રકચપરિચયેનાપ્યખણ્ડસ્વરૂપા
સંક્રોચં કણ્ઠઘોષેણ ચ ન ચ દધતી ભીષણેનોલ્બણેન ।
લોકે જિહ્વાપુટેઽપ્યસ્વલિતપદવતી ભારતી યત્ર વાસં
મા સન્ધત્તેઽપ્રમત્તે હૃદિ ભવતુ હરેર્દ્રાગુપાસ્યં તદાસ્યમ્ ॥ ૬૧॥

સપ્તાર્ચિઃખણ્ડષણ્ડસ્તબકિતકુહરા ચુલ્લિકેવોલ્લસન્તી
દીર્ણા દીર્ઘાદરીવોદ્ધુરરુધિરસુહૃદ્ધારાધુરીણા ।
પાતાલદ્વારિવોદ્યત્ફણિફણમણિરુક્કન્દકીવૃન્દલીઢા-
લીલાહર્યક્ષમૂર્તેઃ ક્ષપયતુ વિપુલા વક્ત્રકુક્ષિર્મદંહઃ ॥ ૬૨॥

ગર્જશ્રીનિર્જિતામ્ભોધરપટલહઠાકૃષ્ટવિદ્યુત્કલાપ
પ્રાયાં પ્રાપ્તાં સમુદ્રાદપિ પરિભાવનો વૈદ્રુમી વલ્લરીં વા ।
રૌદ્રશ્રીવીરવર્યાવરવરણવિધાદન્તબન્ધૂકમાલાં
બિભ્રદ્દૈત્યાન્ત્રમાલામતિપરુષરુષઃ પાતુ દેવસ્ય કણ્ઠઃ ॥ ૬૩॥

માધુર્યોદ્રેકધુર્યં નિજસહજપરિષ્કારવર્યં વિસૃજ્ય-
ક્રૌર્યશ્રીવાર્યમાણાવસરમપરસન્દૈત્યપાલાન્ત્રનાલમ્ ।
ઘોરાકારાં ઘૃણાયાઃ પદમપિ દધતી ધાર્યમાણાં હઠેન
ગ્રીવા શ્રીર્વારણારેઃ શરણમિહ પરં પીવરી વામની વઃ ? ॥ ૬૪॥

માયાહર્યક્ષમૂર્તેઃ ક્ષયસમયપયોવાહસાહસ્રગર્જ-
સ્ફૂર્જન્નિર્ઘોષસમ્ભાવિતવિદલનદિક્સન્ધિસન્ધુક્ષણાય ।
ઉન્મીલત્કાન્તિતન્તૂત્કટકરજઘટાસૂચિસાચિવ્યભાજો
વિષ્વદ્રીચોઽનુવિશ્વોપકૃતિકૃતિભૃતો ભાવયે બાહુદણ્ડાન્ ॥ ૬૫॥

નમ્રા દૈતેયસમ્રાડ્પ્રતિભયપૃતનાઘાતગુર્વી કિલોર્વી
    દીવ્યદ્ધર્વીકરોર્વીપતિફણપરિષત્ખર્વતાં પર્વતાન્તામ્ ।
ઉદ્ધર્તં પ્રોદ્ધુરા નુ પ્રતિદિશવલિતાઃ સર્વતોઽખર્વમૂર્તેઃ
    સાહસ્રા બાહવસ્તે મમ હૃદિ મહિમોન્નાહવાહઃ સ્ફુરન્તુ ॥ ૬૬॥

દીપ્રં યદ્વિપ્રચિત્તપ્રભવમૃગદૃશાં ક્ષિપ્રમોદદધાનં
    નિપ્રઘ્નદ્વિપ્રવર્યપ્રતિભયરયભૃત્કૈટભાટોપલોપમ્ ।
ચક્રં હર્યક્ષમૂર્તેઃ શરણમહમહોરાત્રમાર્તો ભૃશાર્તે
    રેમિ દ્રાક્કાલનેમિક્ષતજરસલન્નેમિ કસ્માદ્બિભેમિ ॥ ૬૭॥

વહ્નિજ્વાલાભજિહ્વાવગલનવિકલત્વામ્બુના સન્નવક્ત્રં (વિકલસ્વામ્બુના)
    નિર્ઘોષૈઃ કણ્ઠકમ્બોશ્ચકિતમિવ મહામૌનમુદ્રાં દધાનમ્ ।
ઘોણાઘ્રાણપ્રહીણં જલજમિવ સિતં પાણિભૂષાયમાણં
    શત્રુભ્યસ્ત્રાણહેતોઃ શરણય નૃહરેરમ્બુજાક્ષસ્ય કમ્બુમ્ ॥ ૬૮॥

ઋક્ષ્યક્ષેણેવ ચક્રં પ્રથનમધિમધુગ્રાસિકોગ્રાકૃતીતિ
    ક્રૌર્યેણ ક્રૌઞ્ચભેદે પટુરિતિ વિકટાં શ્રીમહાસેનશક્તિમ્ ।
દમ્ભોલિં જમ્ભશત્રોરહિહનનમહાસાહસીસ્રદ્ધસન્તો
    દૈત્યોરસ્ત્રોટયન્તસ્તૃણમિવ નૃહરેઃ પાણિજાઃ પ્રીણયન્તુ ॥ ૬૯॥

દૈત્યેન્દ્રધ્વાનસન્ધ્યાધ્વનિમુકુલિતદિક્પાલમાલાસુખર્ધિ-
સ્વાધ્યાયારમ્ભપૂર્વોદિતસતનુદશોઙ્કારિકાકારિભાજઃ ।
નાગાનામિન્દ્રિયાણાં દશસૃણિસદૃશાઃ પ્રાણિનાં પ્રીતિભાજાં
પ્રાયઃ પારીન્દ્રમૂર્તેર્મમ દશ નખરાસ્તે ખરાઃ સ્યુઃ સુખાય ॥ ૭૦॥
સાક્ષાદાલક્ષ્યમાણં યુધિ દલદગદાઘાતશોથપ્રથિમ્ના
    દિઙ્નાગાનાં વિષાણોરુમુસલશકલૈઃ પાણ્ડુનિર્ભગ્નમગ્નૈઃ ।
દૈતેયવ્યાઘ્રવક્ષઃપ્રબલમદગદં શીઘ્રમુલ્લાઘયન્તો
    ભૂશલ્યોદ્ધારકલ્યાભવભયભિષજઃ પાણિજાઃ પાન્તુ યુષ્માન્ ॥ ૭૧॥

ઉન્મીલત્કાલખણ્ડોત્પલમમલિનકઙ્કાલખણ્ટૈઃ કુમુદ્ધ-
    ત્તદ્ધ્યે વ્યક્તમુલ્કામુકુલિતકમલં સ્રાગસૃક્કાભિપૂર્ણમ્ ।
હંસાપત્યાતિરક્તં સુરરિપુવરહૃલ્લક્ષ્યહર્યક્ષમૂર્તેઃ
    ક્રૌર્યક્રીડાતટાગં ક્ષણમધિવિદધુસ્તે નખાઃ સ્યુઃ સુખાય ॥ ૭૨॥

ઉદ્રિઙ્ગદ્રક્તલેખારુણવસનલતાકર્ષમુચ્ચૈસ્ત્રિલોકી
    લક્ષ્મીદૈત્યેન્દ્રવક્ષઃસ્થલપૃથુલશિલાસ્થેયસીમિર્ષ્યયેવ ।

આકર્ષન્તો દ્વિરૂઢાં વિબુધપરિવૃતેનૈવ બાઢં વિધાતું
    નિર્ભીતિ પ્રીણયન્તુ છલહરિવપુષઃ પાણિજાઃ પ્રાણિજાતમ્ ॥ ૭૩॥

વક્ષઃસીમન્તયન્તો નભિદુરભિદુરોરચ્છદછેદદક્ષા
    યત્કિઞ્ચિદ્વિઘ્નનિઘ્ના ઇવ ઘનમઘવદ્વજ્રઘાતોત્થશોથૈઃ ।
સ્થૂલાસ્થિગ્રન્થિકૂટે નિબિડકડકડોડ્ડામરામ્રેડિતેન
    ક્રીડન્તશ્શક્રશત્રોર્નરહરિનખરાસ્તે ખરાઃ સ્યુઃ સુખાય ॥ ૭૪॥

ચાપલ્યેનાપતન્તીમિવ શિરસિ રસજ્ઞાં પ્રતપ્તાસિલેખા-
    ભીમામાલોક્ય સીમાન્તરગતકમલાકૌસ્તુભશ્રીવ ભીત્યા ।
તારાદારાંશુધારાપ્રતિમઘનતમોલ્લાસવલ્લોમવલ્લી-
    લીનશ્રીવત્સલક્ષ્મ ક્ષપયતુ દુરિતં લક્ષહર્યક્ષવક્ષઃ ॥ ૭૫॥

અવ્યાદાકાશકાશસ્તબકપરિણતઃ કૂર્મલોમ્નાં વિવર્તો
    દૃષ્ટાન્તશ્યામશૃઙ્ગસ્ય ચ હરિદુદયચ્ચિત્રલેખૈકમિત્રમ્ ।
મિથ્યદ્વૈરથ્યસજ્જદ્વિપદલનતનોર્દેહપૂર્વાપરર્દ્ધિ-
    સ્થિત્યર્થાપત્તિસાધ્યં ભવભયવિકટાન્મઙ્ક્ષુ નો મધ્યમવ્યાત્ ॥ ૭૬॥

દૈત્યેન્દ્રો દીર્ઘનિદ્રામધિત શિતશિખૈસ્તન્નખૈઃ ખણ્ડિતોરઃ
    કણ્ડૂતિર્યત્ર હસ્તસ્ખલદસિફલકસ્ફારપાદપ્રસારઃ ।
ચઞ્ચજ્જાનૂપધાના તનુરુહનિવહપ્રચ્છદનાઢ્યા
    મઞ્ચેતઃ સ્થૈર્યપટ્વાક્રમતુ કપટહર્યક્ષદક્ષોરુખટ્વા ॥ ૭૭॥

ન્યસ્તે રોષેણ સાચિપ્રસૃમરપરિતો દીધિતૌ યત્ર રક્તે
    મધ્યે નમ્રત્વકમ્રં કુવલયમભિતઃ સઙ્ગતોત્તુઙ્ગતાકમ્ ।
ઉત્તાનસ્વર્ણદણ્ડાયુતકનકશલાકા[લિલાલિત્યશાલિ
    ચ્છત્રાભામાપ તાપાનપનુદતુ હરેર્વામજઙ્ઘાપ્રકાણ્ડઃ ॥ ૭૮॥

સ્તમ્ભોદ્ભૂતસ્ય ભૂમેરુપરિ લિપદસૃક્ચન્દનં સ્યન્દમાના-
    ધોડનૂનારુણ્યલક્ષ્યાદિતિ સુતપૃતનાપાદઘાતાર્તિભાજઃ ।
ફાલે શ્રીખણ્ડપુણ્ડ્રં લિખદિવ નખરજ્યોત્સ્નયા વત્સલત્વાત્
    પ્રહ્લાદસ્ય પ્રણામપ્રવણિતશિરસઃ પાતુ પાદદ્વયી નઃ ॥ ૭૯॥

રુન્ધન્તીવારિબન્ધૂનધિરુધિરધુનીબન્ધુબન્ધૂકમૂર્તે-
    રાકૃષ્યાશાનુવિશ્વાઃ સ્વયમપિ યુગપદ્યોજયન્તીવ ભાન્તિ ।
દ્વૈતં દ્યાવાપૃથિવ્યોર્દલયિતુમુદયન્માંસલાનીચવીચિઃ
    વિશ્વદ્રીચી મરીચીતતિરરુણસમીચીનરોચિર્વિચિન્ત્યા ॥ ૮૦॥

અસ્થાનદ્વારિ તિષ્ઠન્ અસુરવરહૃદો દારુણાયૈકનિષ્ટ-
　　ક્રોધઃ શ્રીપૃષ્ઠનિષ્ઠપ્રતતફણબૃહદ્દીર્ઘપૃષ્ઠસ્થવિષ્ઠઃ ।
પ્રહ્લાદાપ્તપ્રતિષ્ઠઃ પ્રબલદનુજનુઃસૈન્યવિન્યસ્તનિષ્ઠઃ
　　પાયાદ્દેવો વસિષ્ઠપ્રભવભવનુતો દેવગોષ્ઠીગરિષ્ઠઃ ॥ ૮૧॥

દન્તેભ્યઃ પાણિજેભ્યસ્તુહિનગુભગિનીસ્તોમલેખાસુહૃદ્ભ્યો
　　નો બિભ્યત્યબ્ધિશબ્દશ્રવણપરવશાઘોરગમ્ભીરઘોષાત્ ।
ઔર્વજ્વાલાલતાયાઃ કણકુસુમહૃદપ્યુગ્રજિહ્વાલતાયા-
　　યસ્યાઙ્કે નિર્વિશઙ્કં જયતિ જલાધિજા સૈષ દેવોઽવતાદ્વઃ ॥ ૮૨॥

એષ બ્રહ્માણ્ડભાણ્ડામિતવિતતવપુઃ સજ્જનસ્વાન્તદેશે
　　સ્વચ્છન્દામન્દલીલો વિષયસમુદયાકુઞ્ચિતત્ત્વાઞ્ચિતેઽપિ ।
કાષ્ઠાકૈવલ્યલક્ષ્મ્યા જગતિ કતિપયૈઃ કલ્મિભિઃ કાર્યદૃષ્ટ્યા
　　દેવઃ શ્રીમાન્ નૃસિંહોઽવતુ પરમમહાનપ્યણોરપ્યણીયાન્ ॥ ૮૩॥

ઉચ્ચૈર્ઘુષ્ટપ્રહૃષ્ટત્રિદશગણઘનશ્લાઘનાઘૂર્ણનોદ્ય-
　　ન્મૂર્ધાધોધ્વસ્તપુષ્પસ્તબકવિકસિતૈસ્તારકાચક્રવાલૈઃ ।
દૃષ્ટોરઃ પાટરુષ્ટિસ્ફુટવિકટસટાકમ્પસમ્પત્તિચક્ર-
　　ચ્છિન્નૈરાચ્છાદિતાઙ્ગચ્છલનૃહરિતનુર્યચ્છતાદ્વાઞ્છિતં નઃ ॥ ૮૪॥

આભાતીતેન્દુધામાસદરિદરકરઃ સર્વમાનવ્યમાભૃ-
　　ત્કાયોદારસ્સદારોચિતદશનખરઃ કોઽપિ તત્ત્વાધિકારી ।
આભાતીતેન્દુધામા સદરિ કરઃ સર્વદા નવ્યમાભૃ- (સદર)
　　ત્કાયોદારઃ સદારોચિતદશનખરઃ કોઽપિ તત્ત્વાધિકારી ॥ ૮૫॥

તિષ્ઠન્નમ્ભોજપૃષ્ઠે જલનિધિજનુષો રોચિષા રાજમાનો
　　વિદ્યુજ્જ્વાલાકલાપોજ્જ્વલવિપુલસટાકીર્ણવિસ્તીર્ણવક્ત્રઃ ।
જાન્વોર્વિન્યસ્તહસ્તઃ કટિતટવિવલદ્યોગપટ્ટસ્ફુટશ્રી-
　　ભાજોઃ શઙ્ખારિધારી જયતિ નરવપુશ્ચિત્રપારોન્દ્રવક્ત્રઃ ॥ ૮૬॥

પાતૂરઃપીઠપટ્ટાશ્રિતજલધિજનિર્યોગપટ્ટાભિરામો
　　દૈત્યોરઃપાટકટ્ટારકખરનખરો ભ્રાજદટ્ટાટ્ટઘોષઃ ।
સંસારક્લેશહટ્ટાપહરણમહિમા યો હૃદટ્ટાધિવાસી
　　ભક્તાનાં દેવભટ્ટારકકલિતનુતિઃ પીતપટ્ટાંશુકઃ સઃ ॥ ૮૭॥

સત્રાસત્રાણર્ત્રી રિપુસુતવિપદઃ સાધુ નાના ધુનાના-

મારામારાજિવક્ષા નખવિદલિતદુષ્ટાસુરા ભાસુરાભા ।
સામાસામાદિગીતા નિજપદકમલાલમ્બતારાવતારા
ભીમાભીમાર્થદક્ષા તનુરવતુ સુધા ભાનુમાલાનુમાલા ॥ ૮૮॥

પ્રાપ્તા મુદ્રાવિલે શેન પરમમહતા યેન યઃ સન્તરણ્યા
કારાં પૃથ્વીં દધાનો વરભુજગવરત્રાસરક્ષાં વિભાતિ ।
ગાઙ્ગશ્રીશોભમાનાં સ્વતનુમવતુ નઃ શં ખલૂચ્ચૈર્મહિમ્ના
પારાવારપ્રભાવઃ સ નૃહરિરપરા યસ્ય મૈનીહ મૂર્તિઃ ॥ ૮૯॥

જ્યાયસ્યાભાસમાના ભવતિ ન તનુરુટ્છાલિની યારિરાજી-
શ્યામા ક્ષીરોદનીરોચ્છ્વસનકુશલિની યા કૃતોદ્ધૃત્તપાતા ।
હન્યાન્મૂર્તિર્હરેઃ સા દુરિતમતિબલા કાચ્છપી નામ માત્રા-
તિક્રાન્તા દીર્ઘપૃષ્ઠં પરમપિ દધતી માન્દરશ્રીનિધાનમ્ ॥ ૯૦॥

દેહો યસ્યામ્બુવાહોપલસિતરુચિભૃધઃ સરસ્વત્યુપાસ્યઃ
પાતાલક્ષ્માખરાંશુપ્રતિમનખગણો યો હિરણ્યાક્ષજેતા ।
યો નન્દોલ્લાસકાન્તો વિલસતિ બહુલોમાવલી યસ્ય ધામ્નિ
શ્રેયો દદ્યાત્ સ દેવો નિજજનમહસે લબ્ધભૂદારભાવઃ ॥ ૯૧॥

ઉદ્યત્પ્રહ્લાદસમ્પન્નખરકરરુચિઃ સર્વદા રાજદન્ત-
શ્રીધારી યોરિધા રાસ્ત્રન્થરવિવરણો યોઽનુરજ્યદ્રસઙ્ગઃ (?) । (યોરિદા)
ચિલ્લીલાસ્યાધિકારી વિકસિતતનુરુટ્કેસરી કોઽપિ લોકે
કલ્યાણં સ સ્વતુલ્યઃ પ્રણયતુ પરિતોઽલઙ્ક્રિયાભાસમાનઃ ॥ ૯૨॥

લોકપ્રહ્લાદસદ્ભાદ્રપદજનમતિપ્રોલ્લસદ્યેવકાર્યા-
યાસારામ્ભોદધાનધ્વનિવિભવવતી ચુમ્બિતાર્કાક્ષમાલા ।
કૌપીનપ્રીતધાત્રીવલનિયમલયાલોકહર્ષપ્રકાશા
શુક્લાક્ષી સ્ફોટભીમા હરિતનુરવતાદ્વામની ચાધિકા સા ॥ ૯૩॥

પ્રસ્વાપદ્વર્ધનીયા શશિદરપરશુભ્રાજિતા દાનવાર્યા
પારીચર્યાદિતક્ષ્મોપકૃતિગુરુમહાદેવશાસ્ત્રાધિકારા ।
ભાર્ગવ્યાભાસમાના હૃદિ મમ બહુશોકાર્તિવીર્યાવિરાસ્તાં
મૂર્તિ દેવસ્ય કાપિ પ્રતિદિનમવિતામ્નાયશૈલીમુખશ્રીઃ ॥ ૯૪॥

યો ગાધેયાગ્નિનેત્રી ગતદુરિતશતાનન્દસૂર્યા ચ તારા-
ભર્તુર્લક્ષ્મીં દધારાહ્રિયત કિલ યયાપ્યુચ્ચકૈરાવણશ્રીઃ ।
યા વૈદેહ્યાપ્તભીતિક્ષયકરમહિમા સાધુ સા રાઘવીતિ-

ખ્યાતા મૂર્તિર્હરેર્નો વસતુ હૃદિ પરાભૂતમાયાકુરઙ્ગા ॥ ૯૫॥

યોऽભૂત્ સન્તાપસક્તા લવનખરઘટાહારિહસ્તો યદીયા-
સચ્ચક્રે સૂતમૃત્યુસ્ફુરણકુશલતા સૂર્યજાકર્ષશીલઃ ।
યશ્ચેતોહારિહાલાહલભૃતિ બહલપ્રીતિરુત્તાલકેતુઃ
પ્રેયો વૃન્દાવનઃ કૌરવગુરુરભિતઃ શ્રીહરી રક્ષતાં નઃ ॥ ૯૬॥

પ્રત્યક્ષાદિપ્રમાણોનભિમતપરલોકપ્રહર્ષો નયજ્ઞે
પ્રહ્લાદે ચાન્તનિષ્ઠે ઘૃણયતિ ઘૃણિમાલ્યચ્છવિદ્યોતિતો યઃ ।
સર્વેષાં મૂલહેતુઃ કિલ યદભિમતો ભાવહાવપ્રસિદ્ધઃ
સંસારાદુદ્ધરેન્માં કપટહરિતનુઃ શુદ્ધબુદ્ધસ્વરૂપઃ ॥ ૯૭॥

સાર્ધં દુષ્ટૈઃ પ્રવૃદ્ધૈઃ કલિયુગમલહૃત્સિન્ધુજારોહશાલી
યોऽભૂદ્યેવાધિરાજપ્રણયવશતયા લબ્ધજન્માનુકારઃ ।
સંસારે સત્યધર્મા ચરણપરવશો યઃ કૃપાણાં સમુદ્રઃ
દેવોऽભૂદ્રોગહન્તા ભવતુ નરહરિર્ભાસ્વદન્તઃ પ્રકાશઃ ॥ ૯૮॥

દૈત્યાનાં કાલદણ્ડઃ સ્ફુરતુ હૃદિ હરેશ્ચણ્ડલાઙ્ગૂલદણ્ડઃ
શક્રશ્રીલાસ્યદણ્ડઃ સ્વજનઘનકૃપાકેતનોલ્લાસદણ્ડઃ ।
આપદ્રોષણ્ડદણ્ડઃ સુરપુરતરુણીત્રાસભાણ્ડૌઘદણ્ડઃ
સ્વર્લોકચ્છત્રદણ્ડસ્ત્રિપુરનિજજનુર્ઘોષણાતોદ્યદણ્ડઃ ॥ ૯૯॥

સ્વર્ગે સંસર્ગવત્યા દિતિતનુજભુજા વીર્યલક્ષ્મીયુવત્યાઃ
પ્રોદસ્તં કિન્નુ દસ્તા કલિતકચકુલં ક્ષ્માતલે પાતનાય ।
ક્રોધશ્રીબાહુદણ્ડં વલયિતસિતરુઙ્મણ્ડલં તત્પ્રચણ્ડં
ચેતો બ્રહ્માણ્ડકેતોઃ સ્મરહરિવપુષો વાલહસ્તપ્રકાણ્ડં (?) ॥ ૧૦૦॥

ઊષ્માકૂષ્માણ્ડષણ્ડો દયતુ હૃદિ ન તે યાતુ નો યાતુનો ભીઃ
પ્રેતાઃ કે તાવદષ્ટૌ ત્યજત મયિ મહાભૈરવા વૈરવાર્તામ્ ।
રુષ્ટત્વેતેન દુષ્ટગ્રહગણગણનાકાલકઙ્કાલસમ્પ-
ત્સમ્પન્ના તે મદાસ્યં મદાયિતુમુદભૂન્માપયન્નારસિંહં (?) ॥ ૧૦૧॥

ક્ષિપં સર્પાપસર્પ વ્રજ વનગજતે વિદ્રવ છિદ્રદેશા-
દદ્રેર્નિર્ગચ્છ તુચ્છદ્રવિણ ન હિ મદાદચ્છભલ્લ પ્રયચ્છ ।
મા સિંહ ત્રાસ રંહઃ શરભ સરભસં યાહિ શાર્દૂલ દૂરા-
દાહ્વા જિહ્વાઞ્ચલં નશ્ચપલયતિ યતશ્ચિત્રપઞ્ચાસ્યમૂર્તેઃ (?) ॥ ૧૦૨॥

કશ્ચિત્ કૌત્સવવંશકૈરવવનીપ્રાકાશરાકાપતિઃ
    કૃત્વા મર્ત્યહરેરમર્ત્યકલિતાં શ્લોકૈઃ શતૈર્મૌક્તિકૈઃ ।
માલાં દૂષણદૂરણાય ગુણવદ્વિજ્ઞાનશાણાર્ચિતાં (દૂષણદારણાય)
    સત્કણ્ઠાર્પણતો જગામ પરમાનન્દં સ ગઙ્ગાધરઃ ॥ ૧૦૩॥

ઇતિ શ્રીનૃસિંહશતકં સમ્પૂર્ણમ્ ।

Proofread by Saritha Sangameswaran

---

*Shri Nrisimha Shatakam*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*